जीवयैनं वनस्पतिम्। सौतिरुवाच। भस्मीभूतं ततो वृक्षं पन्नगेन्द्रस्य तेजसा। सर्वं भस्म समाहृत्य काश्यपो वाक्यमब्रवीत्। विद्याबलं पन्नगेन्द्र! पश्य मेऽद्य वनस्पतौ। अहं सञ्जीवयाम्येनं पश्यतस्ते भुजङ्गम!। ततः स भगवान् विद्वान् काश्यपो द्विजसत्तमः। भस्मराशीकृतं वृक्षं विद्यया समजीवयत्। अङ्कुरं कृतवांस्तत्र ततः पर्णद्वयान्वितम्। पलाशिनं शाखिनञ्च तथा विटपिनं पुनः। तं दृष्ट्वा जीवितं वृक्षं काश्यपेन महात्मना। उवाच तक्षको ब्रह्मन्नैतदत्यद्भुतं त्वयि। द्विजेन्द्र! यद्विषं हन्या मम वा मद्विधस्य वा। कं त्वमर्थमभिप्रेप्सुर्यासि तत्र तपोधन!। यत्तेऽभिलषितं प्राप्तुं फलं तस्मान्नृपोत्तमात्। अहमेव प्रदास्यामि तत्ते यद्यपि दुर्लभम्। विप्रशापाभिभूते च क्षीणायुषि नराधिपे। घटमानस्य ते विप्र! सिद्धिः संशयिता भवेत्। ततो यशः प्रदीप्तन्ते त्रिषु लोकेषु विश्रुतम्। निरंशुरिव वर्म्मांशुरन्तर्द्धानमितो व्रजेत्। काश्यप उवाच। धनार्थी याम्यहं तत्र तन्मे देहि भुजङ्गम!। ततोऽहं विनिवर्त्तिष्ये स्वापतेयं प्रगृह्य वै। तक्षक उवाच। यावद्धनं प्रार्थयसे तस्माद्राज्ञस्ततोऽधिकम्। अहमेव प्रदास्यामि निवर्त्तस्व द्विजोत्तम!। सौतिरुवाच। तक्षकस्य वचः श्रुत्वा काश्यपो द्विजसत्तमः। प्रदध्यौ सुमहातेजा राजानं प्रति बुद्धिमान्। दिव्यज्ञानात् स तेजस्वी ज्ञात्वा तं नृपतिं तदा। क्षीणायुषं पाण्डवेयमपावर्त्तत काश्यपः"।

**काश्यपनन्दन** पु० कश्यपस्यायम् अण् कर्म्म०। १गरुडे २अरुणे ३देवमात्रे च। "ददानि मेदिनीभागं भवद्भ्योऽहं सुरर्षभाः!। यस्मिन् देशे करिष्यध्वं यज्ञान् काश्यपनन्दनाः" भा०आनु०६६अ०। "मरीचेः कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः। प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश" इत्युपक्रम्य "अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः" इत्युक्त्वा सर्व्वेषां सुरासुरादीनां ततउत्पत्त्युक्तेः ४असुरादिषु च। कश्यपशब्दे १८२७पृ० विवृतिः [कश्यपगोत्रापत्ये

**काश्यपायन** पुंस्त्री० कश्यपस्य गोत्रापत्यं नडा० फक्।

**काश्यपि** पु०कश्यपे भवः इञ्। १अरुणे २गरुडे च। तयोः कश्यपेन विनतायामुत्पत्तिकथा च भा० आ० ३१अ०यथा "एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा। विनता नाम कल्याणी पुत्रकामा यशस्विनी। तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः। उपचक्राम भर्त्तारं, तामुवाचाथ कश्यपः। आरम्भः सफलो देवि! भविता यस्त्वयेप्सितः। जनयिष्यसि पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ। तपसा वालिखिल्यानां मम सङ्कल्पजौ तथा। भविष्यतो महाभागौ पुत्रौ त्रैलोक्यपूजितौ। उवाच चैनां भगवान् कश्यपः पुनरेव ह। धार्य्यतामप्रमादेन गर्भोऽयं सुमहोदयः। एतौ सर्व्वपतत्रिणामिन्द्रत्वं कारयिष्यतः। लोकसम्भावितौ वीरौ कामरूपविहङ्गमौ। शतक्रतुमथोवाच प्रीयमाणः प्रजापतिः। त्वत्सहायौ महावीर्य्यौ भ्रातरौ ते भविष्यतः। नैताभ्यां भविता दोषः सकाशात्ते पुरन्दरः। व्येतु ते शक्र! सन्तापस्त्वमेवेन्द्रो भविष्यसि। न चाप्येवं त्वया भूयः क्षेप्तव्या ब्रह्मवादिनः। न चावमान्या दर्पात्ते वाग्वज्रा भृशकोपनाः। एवमुक्तो जगामेन्द्रो निर्विशङ्कस्त्रिपिष्टपम्। विनता चापि सिद्धार्था बभूव मुदिता तथा। जनयामास पुत्रौ द्वावरुणं गरुडं तथा। विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः। पतत्रिणाञ्च गरुड इन्द्रत्वेनाभ्यषिच्यत"।

**काश्यपिन्** पु० भूम्नि। काश्यपेन प्रोक्तमधीयते णिनि। काश्यपप्रोक्तशाखाध्येतृषु।

**काश्यपेय** पु० कश्यपस्येयम् अण् काश्यपी कश्यपभार्य्या तत्र भवः ढक्। १कश्यपपत्नीजाते सुरासुरादौ। "इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्त्तिताः" भा०आनु० १५०अ०गरुडे च "नागक्षयकरश्चैव काश्यपेयो महाबलः" भा०आ०२३अ०। "काश्यपेयोऽमृताहर्त्ता" ध्वजपूजामन्त्रः।

**काश्यादि** पु० ठञ्ञिठोः प्रत्यययोः प्रकृतिभूते पाणिन्युक्ते शब्दगणे स च गणः काशि वेदि (चेदि इति वा) सांयाति संवाह अच्युत मोदमान शकुलाद हस्तिकर्षू कुनामन् हिरण्य करण गोवासन भारङ्गी अरिन्दम अरित्र देवदत्त दशग्राम शौवावतान युवराज उपराज देवराज मोदन सिन्धुमित्र दासमित्र सुधामित्र सोममित्र छागमित्र सधमित्र (आपदादिपूर्वपदात्कालान्तात्) आपदूर्द्ध तत्"। तात्कालिकः।

**काश्यायन** पुंस्त्री काश्यस्य काशिराजस्य गोत्रापत्यम् नडा० फक्। काशिराजगोत्रापत्ये

**काष** पु० कष्यतेऽनेन कष—करणे घञ्। १कषणपाषाणे (कष्टीपातर) ख्याते प्रस्तरभेदे शब्दचि०। २ऋषिभेदे च

**काषाय** त्रि० कषायेण रक्तः अण्। कषायेण रक्ते १वस्त्रादौ "यदि वासांसि वसीरन् रक्तानि वसीरन् काषायं ब्राह्म-